# Mrityunjaya stotra 1 from Narasimhapurana

# મૃત્યુઞ્જયસ્તોત્ર ૧ માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે

## Document Information

Text title : mRityunjayastotram 1 narasiMhapurANe

File name : mRityunjayastotram1NP.itx

Category : shiva, stotra, vishhnu

Location : doc_shiva

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 7 63-75

Latest update : August 25, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

Mrityunjaya stotra 1 from Narasimhapurana

# મૃત્યુઞ્જયસ્તોત્ર ૧ માર્કણ્ડેયપ્રોક્તં નરસિંહપુરાણે

વિષ્ણુમૃત્યુઞ્જયસ્તોત્રમ્ ।

ૐ નમો ભગવતે મૃત્યુઞ્જયાય ।

તતો વિષ્ણ્વર્પિતમના મારકણ્ડેયો મહામતિઃ ।
તુષ્ટાવ પ્રણતો ભૂત્વા દેવદેવ જનાર્દનમ્
વિષ્ણુનૈવોપદિષ્ટં તુ સ્તોત્રં કર્ણે મહામનાઃ ।
સમ્ભાવિતેન મનસા તેન તુષ્ટાવ માધવમ્ ॥

ૐ નમો ભગવતે વાસુદેવાય ।
માર્કણ્ડેય ઉવાચ -
નારાયણં સહસ્રાક્ષં પદ્મનાભં પુરાતનમ્ ।
પ્રણતોઽસ્મિ હૃષીકેશં કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૩॥

ગોવિન્દં પુણ્ડરીકાક્ષમનન્તમજમવ્યયમ્ ।
કેશવં ચ પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૪॥

વાસુદેવં જગદ્યોનિં ભાનુવર્ણમતીન્દ્રિયમ્ ।
દામોદરં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૫॥

શઙ્ખચક્રધરં દેવં છન્નરૂપિણમવ્યયમ્ ।
અધોક્ષજં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૬॥

વારાહં વામનં વિષ્ણું નરસિંહં જનાર્દનમ્ ।
માધવં ચ પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૭॥

પુરુષં પુષ્કરં પુણ્યં ક્ષેમબીજં જગત્પતિમ્ ।
લોકનાથં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૮॥

ભૂતાત્માનં મહાત્માનં જગદ્યોનિમયોનિજમ્ ।
વિશ્વરૂપં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૬૯॥

સહસ્રશિરસં દેવં વ્યક્તાવ્યક્તં સનાતનમ્ ।
મહાયોગં પ્રપન્નોઽસ્મિ કિં મે મૃત્યુઃ કરિષ્યતિ ॥ ૭૦॥

ઇત્યુદીરિતમાકર્ણ્ય સ્તોત્રં તસ્ય મહાત્મનઃ ।
અપયાતસ્તતો મૃત્યુર્વિષ્ણુદૂતૈશ્ચ પીડિતઃ ॥ ૭૧॥

ઇતિ તેન જિતો મૃત્યુર્માર્કણ્ડેયેન ધીમતા ।
પ્રસન્ને પુણ્ડરીકાક્ષે નૃસિંહે નાસ્તિ દુર્લભમ્ ॥ ૭૨॥

મૃત્યુઞ્જયમિદં પુણ્યં મૃત્યુપ્રશમનં શુભમ્ ।
માર્કણ્ડેયહિતાર્થાય સ્વયં વિષ્ણુરુવાચ હ ॥ ૭૩॥

ય ઇદં પઠતે ભક્ત્યા ત્રિકાલં નિયતઃ શુચિઃ ।
નાકાલે તસ્ય મૃત્યુઃ સ્યાન્નરસ્યાચ્યુતચેતસઃ ॥ ૭૪॥

હૃત્પદ્મમધ્યે પુરુષં પુરાણં નારાયણં શાશ્વતમાદિદેવમ્ ।
સઞ્ચિન્ત્ય સૂર્યાદપિ રાજમાનં મૃત્યું સ યોગી જિતવાંસ્તદૈવ ॥ ૭૫॥

ઇતિ ।

નરસિંહપુરાણ અધ્યાય ૭ શ્લોકસંખ્યા ૭૫
ઇતિ શ્રીનરસિંહપુરાણે માર્કણ્ડેયમૃત્યુઞ્જયો નામ સપ્તમોઽધ્યાયઃ ॥ ૭॥

From Narasimhapurana adhyAya 7
https://archive.org/details/NarsimhaPuranGitapress
Proofread by Singanallur Ganesan singanallur at gmail.com

*Mrityunjaya stotra 1 from Narasimhapurana*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*